# ऋग्वेदः - मण्डल १०

## सत्यधृतिर्वारुणिः



**Exported from Wikisource on २६ जुलाईमासः २०२४**

दे. आदित्यः(स्वस्त्ययनम्)/अदितिः। गायत्री

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः ।

दुराधर्षं वरुणस्य ॥१ ॥

नहि तेषाममा चन नाध्वसु वारणेषु ।

ईशे रिपुरघशंसः ॥२ ॥

यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय ।

ज्योतिर्यच्छन्त्यजस्रम् ॥३ ॥

## सायणभाष्यम्

' महि ' इति तृचं चतुस्त्रिंशं सूक्तं वरुणपुत्रस्य सत्यधृतेरार्षं गायत्रमादित्यदेवताकम् ।तथा . चानुक्रान्तं ---- ‘ महि सत्यधृतिर्वारुणिरादित्यं स्वस्त्ययनं गायत्रं वा ' इति । धनलिप्सया प्रवसन्तं शिष्यमाचार्योऽनेन सूक्तेनाभिमन्त्रयते। सूत्र्यते हि -- महि त्रीणामित्यनुमन्त्र्यैवमतिसृष्टस्य न कुतश्चिद्भयं भवतीति विज्ञायते' (आश्व. गृ. [३. १०. ७](#)-८) इति ।।

महिं त्री॒णामवो॑ऽस्तु द्यु॒क्षं मि॒त्रस्या॑र्य॒म्णः ।

दु॒रा॒धर्षं॒ वरु॑णस्य ॥ १

महिं । त्री॒णाम् । अव॑ः । अ॒स्तु॒ । द्यु॒क्षम् । मि॒त्रस्य॑ । अ॒र्य॒म्णः ।

दुः॒ऽआ॒धर्षं॑म् । वरु॑णस्य ॥१

महि । त्रीणाम् । अवः । अस्तु । द्युक्षम् । मित्रस्य । अर्यम्णः ।

दुःऽआधर्षम् । वरुणस्य ॥१

“त्रीणां त्रयाणां "मित्रस्य "अर्यम्णः "वरुणस्य च “द्युक्षं दीप्तमत एव “दुराधर्षम् अन्यैर्धर्षितुं बाधितुमशक्यं "महि महत् "अवः रक्षणमस्माकम् "अस्तु ।' त्रीणामित्यपि छन्दसि दृश्यते (का. ७. १. ५३. १ ) इति वचनात् त्रयादेशाभावः । 'नामन्यतरस्याम् ' इति नाम उदात्तत्वम् ॥

न॒हि तेषा॑म॒मा च॒न नाध्वंसु वा॒र॒णेषुं ।

ईशे॑ रि॒पुर॒घशं॑सः ॥ २

न॒हि । तेषा॑म् । अ॒मा । च॒न । न । अध्वं॑ऽसु । वा॒र॒णेषुं ।

ईशे॑ । रि॒पुः । अ॒घऽशं॑सः ॥२

नहि । तेषाम् । अमा । चन । न । अध्वऽसु । वारणेषु ।

ईशे । रिपुः । अघऽशंसः ॥२

अमेति गृहनाम। "अमा “चन गृहेष्वपि "तेषां वरुणमित्रार्यम्णां तदनुगृहीतानां स्तोतॄणां वा अघशंसः अघमनर्थमाशंसमानः "रिपुः शत्रुः "नहि "ईशे न खलु हिंसितुमीष्टे ॥ ‘लोपस्त आत्मनेपदेषु' इति तलोपः ।अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते ॥ तथा “अध्वसु मार्गेषु “वारणेषु यत्र पुरुषा निवार्यन्ते तेषु च स्थानेषु शत्रुर्निवारयितुं "न ईष्टे ॥

यस्मै॑ पु॒त्रासो॒ अदि॑तेः॒ प्र जी॒वसे॒ मर्त्या॑य ।

ज्योति॒र्यच्छ॒न्त्यजं॑स्रम् ॥ ३

यस्मै॑ । पु॒त्रासः॑ । अदि॑तेः । प्र । जी॒वसे॑ । मर्त्या॑य ।

ज्योतिः॑ । यच्छं॑न्ति । अजं॑स्रम् ॥३

यस्मै । पुत्रासः । अदितेः । प्र । जीवसे । मर्त्याय ।


ज्योतिः । यच्छन्ति । अजस्रम् ॥३

“अदितेः अदीनाया देवमातुः "पुत्रासः पुत्रा मित्रादयः "यस्मै “मर्त्याय मनुष्याय स्तोत्रे “अजस्रम् अविच्छिन्नं "ज्योतिः तेजः "जीवसे जीवितुं “प्र “यच्छन्ति तस्य शत्रुर्नेश्वर इत्यर्थः ॥ ॥ ४३ ॥

## टिप्पणी

पाष्ठौहे द्वे (ग्रामगेयः)

मित्र, वरुण एवं अर्यमा देवेषु समञ्जनेन अदितिदेव्याः आविर्भावः भवति, अयं कथनं अन्यासु ऋक्षु अपि उपलब्धः अस्ति। किन्तु अदित्या देव्याः एकं वैशिष्ट्यं - हूतिश्च प्रतिश्रुतिश्च, अयं पाष्ठौहे साम्नि एव प्रत्यक्षं भवति। अदितिः कर्णतः, श्रवणतः सम्बद्धा अस्ति, अयं वास्तुपुरुषस्य संदर्भे कथितमस्ति।




वास्तुपुरुषः

[दिति उपरि टिप्पणी]

[अर्यमा उपरि संक्षिप्त टिप्पणी एवं संदर्भाः]

[द्रविणविस्पर्द्धसी द्वे] (आरण्यकम्)

अग्निहोत्रे आहवनीयोपरि अग्न्युपस्थानम् -- महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः ।दुराधर्षं वरुणस्य ।

नहि तेषाममा चन नाध्वसु वारणेष्वा । ईशे रिपुरघशंसः । ते हि पुत्रासो अदितेश्छर्दिर्यच्छन्त्यजस्रम् । वि दाशुषे वार्याणीति प्राजापत्येन तृचेनोपतिष्ठते १० । यं कामयेत स्वस्ति पुनरागच्छेदिति तमेताभिरन्वीक्षेत । स्वस्त्येव पुनरागच्छतीत्ययज्ञसंयुक्तः कल्पः आप.श्रौ.सू. ६.१७.११

१०.१८५.१ महि त्रीणाम् इति

महित्रीणाम् । आदित्यदेवत्यस्तृचो गायत्रः । पथि स्वस्त्ययनम् । महि महत् त्रीणां त्रयाणामादित्यानाम् अवोस्तु अवनमवः पालनं भवतु । कथंभूतं पालनम् । द्युक्षम् द्युतिमन्ति द्रव्याणि यस्मिन्पालने क्षियन्ति निवसन्ति तत् द्युक्षम् । किंनाम्नामादित्यानाम् । मित्रस्य अर्यम्णः वरुणस्य च । - वा.सं.(उ.भा.) ३.३१

१०.१८५.२ नहि तेषां इति

नहि तेषाम् । नहि कदाचित्तेषामादित्यपालितानां यजमानानाम् अमाचन । अमाशब्दो गृहवचनः । चनशब्दोऽप्यर्थे । गृहेऽपि सताम् । नाध्वसु वारणेषु । नच मार्गेषु सता मम । कथंभूतेषु वारणेषु । यत्रावस्थिताश्चौराः पथिकान्वारयन्ति ते वारणाः पन्थानः । एतदुक्तं भवति । न गृहस्थितानां नापि गृहाद्बहिः । - वा.सं.(उ.भा.) ३.३२

१०.१८५.३ ते हि पुत्रासो इति

ते हि पुत्रासः । कस्मात् पुनरादित्यगुप्तानां गृहे बहिश्च शत्रुर्नेष्टे, यतस्ते पुत्रा अदितेः । एवं तावदेकम् । इदमपरम् । प्रजीवसे मर्त्याय ज्योतिर्यच्छन्ति । प्रयच्छन्ति ददति । कस्मै । मर्त्याय मनुष्याय । किं

प्रयच्छन्ति ज्योतिः । अजस्रम् अनुपक्षीणम् । किमर्थं ज्योतिः प्रयच्छन्ति । जीवसे चिरंजीवनाय - वा.सं.(उ.भा.) ३.३३

MS.1.5.4: 1.5.11: KS.7. 2,9;

बृहदुपस्थानम् - नाध्वसु वारणेष्वित्येति ह वा अध्वानो वारणा य इमेऽन्तरेण द्यावापृथिवी एतान्ह्येतदुपतिष्ठते तस्मादाह नाध्वसु वारणेष्विति - माश २.३.४.३७

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः ...प्राजापत्येन तृचेनोपतिष्ठते । यं कामयेत स्वस्ति पुनरागच्छेदिति तमेताभिरन्वीक्षेत ।। आप.श्रौ. ६.७.१०

MC.1.6.2.11; MG. I. 5-4; Rvidh. 4.23.3. P:

महि त्रीणामित्येकपातिन्यः शांश्रौ १२.२.१४

AG. 3.10.7; Svidh. 2.1.5. Cf. BrhD. 8.86; Rvidh. 2.31.6. Designated as mahitram (se. suktam) VaDh.26.5; BrhD. 8.86.


सूक्तं १०.८१ सूक्तं १०.१२१ सूक्तं १०.१६१

सूक्तं १०.८२ सूक्तं १०.१२२ सूक्तं १०.१६२

# About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- ThomasBot
- Puranastudy
- Shijualex
- Detlef108

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium